Click here to go back

Guru kavacha - Gujarati




## અથ બૃહસ્પતિ કવચં

ઓઁ અસ્ય શ્રી બૃહસ્પતિ કવચ મહામંત્રસ્ય ઈશ્વર ઋષિઃ| અનુષ્ટુપ્છંદઃ| બૃહસ્પતિર્દેવતા| અં બીજં| શ્રીં શક્તિઃ| ક્લીં કીલકં| મમ બૃહસ્પતિ ગ્રહપ્રસાદ સિદ્ધ્યર્થે જપે વિનિયોગઃ|| (કરન્યાસઃ) ગાં અંગુષ્ઠાભ્યાં નમઃ| ગીં તર્જનીભ્યાં નમઃ| ગૂં મધ્યમાભ્યાં નમઃ| ગૈં અનામિકાભ્યાં નમઃ| ગૌં કનિષ્ઠિકાભ્યાં નમઃ| ગઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ|| (અંગન્યાસઃ) ગાં હૃદયાય નમઃ| ગીં શિરસે સ્વાહા| ગૂં શિખાયૈ વષટ્| ગૈં કવચાય હું| ગૌં નેત્રત્રયાય વૌષટ્| ગઃ અસ્ત્રાય ફટ્| ભૂર્ભુવસ્સુવરોમિતિ દિગ્બંધઃ|| (ધ્યાનં) તપ્તકાંચન વર્ણાભ્યં ચતુર્ભુજસમન્વિતં| દંડાક્ષસૂત્રમાલાં ચ કમંડલં વરાન્વિતં|| પીતાંબરધરં દેવં પીતગંધાનુલેપનં| પુષ્પરાગમયાભૂષં વિચિત્રમકુટોજ્વલં|| સ્વર્ણાશ્વરથમારૂઢં પીતધ્વજ સુશોભિતં| મેરોઃ પ્રદક્ષિણં સંયગાચરત્નં સુશોભનં|| અભીષ્ટવરદં દેવં સર્વજ્ઞં સુરપૂજિતં| સર્વકામાર્થ સિદ્ધ્યર્થં પ્રણમામિ ગુરું સદા|| (અથ કવચં) બૃહસ્પતિઃ શિરઃ પાતુ લલાટં પાતુ મે ગુરુઃ| કર્ણૌ સુરગુરુઃ પાતુ નેત્રે મે ભીષ્ટદાયકઃ|| નાસાં પાતુ સુરાચાર્યો જિહ્વાં મે વેદપારગઃ| મુખં મે પાતુ સર્વજ્ઞો ભુજૌ પાતુ શુભપ્રદઃ|| કરૌ મે વરદઃ પાતુ વક્ષૌ મે ગીષ્પતિઃ| સ્તનૌ મે પાતુ વાગીશઃ કુક્ષી મે શુભલક્ષણઃ|| નાભિં પાતુ સુનીતિજ્ઞઃ કટિં મે પાતુ સર્વદઃ| ઊરૂ મે પાતુ પુણ્યાત્મા જંઘે મે જ્ઞાનદઃ પ્રભુઃ|| પાદૌ મે પાતુ વિશ્વાત્મા સર્વાંગં સર્વદા ગુરુઃ|| (ફલશ્રુતિઃ) યઃ ઇદં કવચં દિવ્યં ત્રિસંધ્યં પ્રપઠેન્નરઃ| સર્વાન્ કામાન્વાપ્નોતિ સર્વત્ર વિજયી ભવેત્|| સર્વત્ર પૂજ્યો ભવતિ વાક્પતેશ્ચ પ્રસાદતઃ| ઇતિ બ્રહ્મવૈવર્ત પુરાણે ઉત્તરખંડે બૃહસ્પતિ કવચં||

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com

Click here to go back